विशेषसंस्थानैर्निर्द्दिशेन्मतिमान् भिषक् । शास्त्रमार्गानुसारेण यथा प्रोक्तं तपोधनैः एतेषामेव सर्व्वेषामावर्त्तानां विचक्षणैः । रोमणां तिलकता संज्ञा वाजिलक्षणवेदिभिः । शुभाशुभौ तु यत्र द्वौ तत्रैको न फलप्रदः । एवं हेम्ना दहेत् पापं तेन दोषो न दुष्यति । अथ वा वाजिनो मुख्याः ये चाङ्गादिगुणाधिकाः । दत्त्वा ब्राह्मणाः क्रयेणैव दुरावर्त्तस्तु काकुदी । श्रीवत्सो रोमजश्चैव रोचमानस्तथैव च । अङ्गादौ पेषली नाम राजरत्नप्रदाः सदा । प्रयाणे मारुतं विद्याल्ललाटे च हुताशनम् । उरसि चाश्विनौ देवौ चन्द्रासूर्य्यौ च मूर्द्धनि । रन्ध्रे स्कन्दविशाखौ च उपरन्ध्रे हरीहरौ । इत्येवं पूजिताश्चेत्र ते दशबन्धास्तु वाजिनः । अप्येकेन विहीना ये भवेयुरशुभास्तदा” ।

अथ पुण्ड्रलक्षणम् अत ऊर्द्ध्वं प्रवक्ष्यामि पुण्ड्राणां लक्षणम् शुभम् । शुक्तिशङ्खगदापद्मखड्गचक्राङ्कुशोपमाः । शिरोललाटं वदनं यः पुण्ड्रो व्याप्य तिष्ठति । स धन्यः पूजितो नित्यं स्नुदुकश्चैव योभवेत् । पर्व्वतेन्दुपताकाभा ये च रुद्दामसन्निभाः । ते सर्व्वे पूजिताः पुण्ड्रा धनधान्यफलप्रदाः । इति पुण्ड्राः समाख्याताः पूर्व्वशास्त्रानुसारतः । अशुभांश्चैव वक्ष्यामि यथायोगं समासतः । काककङ्कक-बन्धाहिश्वगोमायुसन्निभाः । असिताः पीतका रक्ताः पुण्ड्रका न च पूजिताः । तिर्य्यगग्राश्चैव विच्छिन्नाः शृङ्खलापाशशोभिताः । जिह्वाकृष्णाच्छिद्राणि भस्मवर्णनिभानि च । मूलाग्रा वामदेहस्थाः पुण्ड्रका न शुभप्रदाः । पुण्ड्रकाणि विनश्यन्ति भिन्नवर्णानि वाजिनः” ।

अथ पुष्पलक्षणम् । “आगतं वत्सरन्तस्य ये भवन्त्यन्यवर्णकाः । विन्दवः पुष्पसंज्ञा वा हिताहितत्वकारकाः । तेषां प्रदेशभेदे च लक्षणं यद्व्यवस्थितम् । तत्तथैव समासेन विस्पष्टं कीर्त्त्यतेऽधुना । प्रपाणे च ललाटे च कक्षे मूर्द्धनि कर्णयोः । निगाले चैव केशान्ते पुष्पं धन्यतमं स्मृतम् । स्कन्धे वक्षसि कक्षे च मुष्कयोर्बाहुके मुखे । हनौ पृष्ठे च वाहानां पुष्पं स्वामिहितप्रदम् । नाभौ केशे तथा कण्ठे दन्ते चैव हि वाजिनाम् । पुष्पं धन्यतमं प्रोक्तं भर्त्तुः सर्व्वार्थसाधकम् । अप्रशस्तानि दृष्टानि मुनिभिर्यानि शास्त्रतः । तानि सम्यक् प्रवक्ष्यामि पुष्पाण्यन्यानि दर्शनात् । अधरोष्ठे करे प्रोथे उत्तरोष्ठे तथैव च । घोणायां गण्डयोश्चैव शङ्खयोश्च तथा भ्रुवोः । ग्रीवायां चैव वाहे च सृक्कणोः स्फूरके स्फिचि । पायौ क्रोड्डे च पुष्पाणि निन्दितानीति निश्चयः । रक्तं पीतं तथा कृष्णं पुष्पं सर्व्वत्र नेष्यते । शुभप्रदेशे सञ्जातं भवेत्साधारणं ततः । पुत्रलाभधनप्राप्तिमारोग्यं विजयं तथा । विद्यात् पुष्पैः शुभैर्भर्त्तुरशुभैश्च विपर्य्ययम् । सर्व्वाङ्गपुष्पितो वाहो परित्याज्यो न संशयः” ।

अथ गतिशुभादिलक्षणम् “दूरमुत्क्षिप्य यः पादांस्तप्तांगारान् स्पृशन्निव । पुलं याति शुभं हृष्टो वाजी भद्रगतिस्तु सः । पूजिता वृषमातङ्गसिंहशार्दूलगामिनः । अतोऽन्यगतयो नेष्टाः सर्व्वशुद्धतुरङ्गमाः । संकीर्णा एकतोभ्रष्टा चङ्क्रमौघ विवर्जिताः । अत्यूर्द्ध्वा चैव वक्रा च वाजिनां निन्दिता गतिः । षोडशाच्छोटिकाभिस्तु करवेष्टितजानुभिः । शतं द्विगुणितं गत्वा हस्तानां पुनरेति यः । स शीघ्रगतिरित्युक्तो वाजी धन्यस्तपोधनैः । दशहीना भवन्त्येते मध्यमाधमगा हयाः ।

अथ वर्णभेदेन नामभेदः “श्वेतः कोकाह इत्युक्तः कृष्णः खुङ्गाह उच्यते । पीतको हरितः प्रोक्तः कषायो रक्तकः स्मृतः । पक्वतालनिभो वाजी कयाहः परिकीर्त्तितः । पीयूषवर्णः सेराहो गर्दभाभः सुरूहकः । नीलो नीलक एवाश्वस्त्रियूहः कपिलः स्मृतः । शिलहः कपिशो वाजी पाण्डुकेशः सुबालधिः । हलाहश्चित्रकश्चत्रियुलाहः श्वेतपीतकः । ईषत्पीतः कुलाहस्तु यो भवेत् कृष्णजानुकः । कृष्णा चास्ये भवेद्रेखा पृष्ठवंशानुगामिनी । उराहः कृष्णजानुस्तु मनाक्पाण्डुस्तु यो भवेत् । वेरुहाणः स्मृतो वाजी पाटलो यः प्रकीर्त्तितः । रक्तपीतकषायोत्थो वर्णजो यस्य दृश्यते । दुकुलाहः स विख्यातो वर्णो वाहस्य देहजः । पूर्व्वोक्तानां च वर्णानां मुखपुण्ड्रेण वाजिनाम् । ये भवन्ति परे भेदास्तान् ब्रवीम्यनुपूर्व्वशः । कोकाहः पुण्ड्रको नाखः कोङ्कराहः प्रकीर्त्तितः । खुङ्गाहखरगाहौ च हरिकोहरिराहिकः । कलाहश्चैव वोल्लाहः सिराहः सिन्दुराहकः । कुलाहः कुलुराहस्तु सराहः शुभराहकः । चारुराहो जयेदश्वो वोरुराहो न यः स्मृतः । कुलीहो दुरुणाहस्तु युद्धके नैव कीर्त्तितः । त्रियुहस्त्रियुलाहश्च युद्धके नैव कीर्त्तितः । त्रियुहस्त्रियुलाहश्च चित्रलाङ्गश्च यो भवेत्” ।

अथ रोमवर्णभेदेन शुभाशुभलक्षणम् । “यस्य गौराणि पीतानि गात्ररोमाणि वाजिनः । स भर्त्तुः श्रियमाधत्ते यस्य शुक्लासितानि च । यस्य पादाः सिताः सर्व्वे पुच्छं वक्षो मुखं तथा । ऊर्द्ध्वजङ्घा सिता यस्य तं विद्याद्दृष्टमङ्गलम् । प्रभूतासिततारश्च प्रशस्ता मुनिभिः स्मृताः । यस्तु पीतासितैस्तारैः स धन्यः कीर्त्तितो हयः । प्रशस्तः